उपशास्त्री-II साहित्य - तृतीय-पत्रम्
रघुवंश महाकाव्यम्
द्वितीयः सर्गः

Date ___/___/___

प्र०(1)- पद्यमिदम् व्याख्येयम् ।

अलं महीपाल! तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्तिरंहः शिलोच्चये मूर्च्छति मारुतस्य ॥

उत्तरम्- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति । अस्मिन श्लोके सिंहो दिलीपमुक्तवान् —

व्याख्या- हे महीपाल! = हे भूपते!, तव = भवतः, श्रमेण = शराकर्षण-प्रयासेन, अलं = न प्रयोजनम्, इतः = मयि सिंहे, प्रयुक्तं = निक्षिप्तम् अपि, अस्त्रं = बाणादिकम्, वृथा = व्यर्थम्, स्यात् = भवेत् । यतः पादपोन्मूलनशक्तिः = वृक्षोत्पाटन समर्थम्, मारुतस्य = वायोः, रंहः = वेगः, शिलोच्चये = पर्वते, न मूर्च्छति = न प्रसरति ।

सिंहो दिलीपमुक्तवान् - राजन! मां प्रहर्तुं परिश्रमं मा कुरु, साम्प्रतं त्वमस्त्रं प्रयोक्तुमसमर्थोऽसि, दैवात् समर्थोऽपि भवेश्चेत् तदस्त्रं मम न किमपि कर्तुं प्रभवेत, यतो हि वायोर्यो वेगः तरुनुन्मूलयति स किमपि पर्वते कर्तुं न शक्नुयात । यथा वृक्षोत्पाटनसमर्थः पवनः नोत्पाटयितुं शक्नुयात्तथैव त्वमपि मयि किमपि कर्तुं न प्रभविष्यसि

Renu Devi
08/08/20
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

Page No.

शास्त्री-I साहित्य

अभिज्ञानशाकुन्तलम्

Date ___/___/___

प्र० (1) पद्यमिदम् व्याख्येयम् ।

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुकीभवति यत्सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ॥

उत्तरम् - प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदासस्य प्रणीतं अभिज्ञानशाकुन्तलम् नाट्यकाव्यस्य पञ्चमो अंकात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके राजा हंसपदिकया नीयमानं सोपालम्भं गीतमाकर्ण्य तदर्थं भावनया समुत्कण्ठितो राजा दुष्यन्तः स्वमनसि विचारयति —

व्याख्या:— जन्तुः = सर्वोऽपि प्राणी, सुखितोऽपि = प्रियजनसान्निध्येन संतोषमनुभवन्नपि, रम्याणि = मनोहराणि चन्द्र-चन्दन प्रमदादीनि वस्तूनि, वीक्ष्य = प्रसङ्गादवलोक्य, मधुरान् = श्रवणसुभगान्, शब्दान् = भ्रमरझंकारकोकिलालापगीतादिशब्दान्, निशम्य = श्रवणविषयीकृत्य च पर्युत्सुकीभवति = उत्कण्ठते, इति यत् = सुखितस्यापि जन्तोः सुन्दररूपदर्शनं - मधुरशब्द-श्रवणमात्रेण पर्युत्सुकीभवनं तत् = तस्मात् कारणात् पर्युत्सुकीभवनात् भावस्थिराणि = भावनात्मकतया मनसि लीनानि जननान्तरसौहृदानि पूर्वेषु जन्मसु अनुभूतानि प्रियजनसम्बन्धिविशेषान् चेतसा = चित्तेन, अबोधः = ईषद्-बोधः = तत्पूर्वः तत्पूर्वकम् = विशेषज्ञानाभावपूर्वं नूनं = ध्रुवं निश्चयेन स्मरति = मनसि भावयति ।

Renu devi
08/08/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया

Page No. ____

शास्त्री-II साहित्य

मेघदूतम्

Date ___/___/___

प्र(1) — पद्यमिदम् व्याख्येयम् ।

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां,
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः,
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥

उत्तरम् :- प्रसंगः — पद्यमिदं महाकविश्रीकालिदासप्रणीतस्य मेघदूताख्यखण्डकाव्यस्य पूर्वमेघभागादुद्धृतम् । यत्र यक्षः शुभशकुनानि सूचयन् अलकापुरीं गन्तुमयं समयोऽनुकूल इति मेघं निवेदयति ।

व्याख्या :— अनुकूलः = अनुगुणः, पवनः = वायुः, मन्दं = यथा मन्थरमिवा त्वाम् = भवन्तम्, मन्दं = शनैः शनैर्यथा स्यात्तथा, नुदति = प्रेरयति । अयम् = एषः, गन्धेन सहितं सगन्धः = सगर्वः (गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोः' इति विश्वः । 'सगन्धो बन्धुरिष्यते' इति हलायुधः । ) सम्बन्धीति केचित् । ते = तव, वामः = वाम भागस्थितः सुन्दरो वा, चातकः = पक्षिविशेषः, मधुरम् = मनोरमं यथा स्यात्तथा, नदति = शब्दं करोति । गर्भस्य आधानं इति गर्भाधानम् तत् एव क्षणः गर्भाधानक्षणः, तस्मिन् परिचयः = संस्तवः, इति गर्भाधानक्षणपरिचयस्तस्मात्. गर्भाधानक्षणपरिचयात् = रतिकालजातसंस्तवकारणात् ('निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः' इति 'संस्तवः स्यात्परिचयः' इति चामरः ) खे = नभसि आबद्धा = बद्धा, माला = पंक्तिर्याभिस्ता आबद्धमालाः = बद्धपंक्तयः । बलाकाः विसकण्ठिकाः, नयनयोः = नेत्रयोः, सुभगः = मनोहरः तं नयनसुभगम् = नेत्रमनोहरम्, भवन्तम् = त्वाम्, मेघम् नूनम् = अवश्यमेव, सेविष्यते = समाचारिष्यन्ति । अनुप्रासालंकार मन्दाक्रान्तावृत्तम् ।

Renu Devi
राधाउमाकान्त सं०, 08/08/20
महावि० सुखसेना, पूर्णिया

Page No. 1

उपशास्त्री -I साहित्य - तृतीय - पत्रम्
रघुवंश महाकाव्यम्
द्वितीय: सर्गः

Saathi

Date __/__/____

प्र० (1) पद्यमिदम् व्याख्येयम् ।
प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता ।
प्रणम्य चानर्च विशालमस्याः शृङ्गान्तरं द्वारमिवार्थसिद्धेः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति।
अस्मिन् श्लोके सुदक्षिणा नन्दिन्याः शृंगान्तरम् अक्षतानां पात्रेण सह पूजाम् करोति ।

व्याख्या:- साक्षतपात्रहस्ता = सतण्डुलभाजनकरा, सुदक्षिणा = राजमहिषी, पयस्विनीं = प्रशस्तक्षीरां, तां = पूर्वोक्तां नन्दिनीम्, प्रदक्षिणीकृत्य = प्रदक्षिणां विधाय, प्रणम्य = अभिवाद्य, नमस्कृत्य, च = पुनः अस्याः = धेनोः, विशालं = विपुलं, शृङ्गान्तरं = शृङ्गमध्यम्, अर्थसिद्धेः = स्वकार्यसिद्धेः, द्वारं = प्रवेश मार्गम्, इव = यथा, आनर्च = पूजयामास ।
सुदक्षिणा हस्तयोः अक्षतपात्रम् आदाय नन्दिन्याः परिक्रमां प्रणामं च विधाय तस्याः विशालं शृङ्गयोर्मध्यभागं कार्यलाभस्य पुत्रप्राप्तेः साधनमिव पूजितवती ।

Renu Devi
08/08/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।